Om Sri MahaaGanapathaye Namah Om Sri Gurubhyo Namah Om Rishibhyo Namah

# Kuja Homam

## Laghu Paddhati (Short Procedure)

*By P.V.R. Narasimha Rao* (www.VedicAstrologer.org)

A separate document gives a detailed description of how to perform Kuja Homam. This document puts all the mantras given in that document in one place. After one reads the other document and becomes proficient in the procedure, one can perform the homam by just referring to this document.

### Anujnaa (Permission)

ॐ ऋद्ध्यास्म हव्यैर्नमसोपसद्य । मित्रं देवं मित्रधेयं नो अस्तु । अनूराधान् हविषा वर्धयन्तः । शतं जीवेम शरदः सवीराः ।

### Aachamanam (sipping water to purify)

ॐ केशवाय स्वाहा । ॐ नारायणाय स्वाहा । ॐ माधवाय स्वाहा ।

### Vighneswara Pooja (worshipping the remover of obstacles)

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं । प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशान्तये ॥

अगजानन पद्मार्कं गजाननमहर्निशं । अनेकदं तं भक्तानां एकदन्तं उपास्महे ॥

वक्रतुंड महाकाय कोटिसूर्यसमप्रभ । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

### Praanaayaamam (restraining the life force)

ॐ नमो भगवते वासुदेवाय । ॐ नमश्शिवाय । ॐ गं गणपतये नमः ।

### Sankalpam (taking the vow)

ॐ ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वर प्रीत्यर्थम् श्री कुज प्रसाद सिद्ध्यर्थम् अद्य शुभदिने शुभमुहूर्ते श्री कुज होमकर्म यथाशक्ति करिष्ये ।

**Kalasa Suddhi (water purification)**

वं

गंगे च यमुने चैव गोदावरि सरस्वति ।

नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

अमृतं भवतु

ॐ ब्रह्मणे नमः ।

ॐ यमाय नमः ।

ॐ सोमाय नमः ।

ॐ रुद्राय नमः ।

ॐ विष्णवे नमः ।

ॐ इन्द्राय नमः ।

**Agni Pratishthaapana (fire installation)**

ॐ भूर्भुवस्सुवरोम्

क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः ।

इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ।

ॐ भूर्भुवस्सुवः स्वाहा ।

अदितेऽनुमन्यस्व । अनुमतेऽनुमन्यस्व । सरस्वतेऽनुमन्यस्व । देव सवितः प्रसुव ।

चत्वारि शृंगास्त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य ।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यांᳲ आविवेश ।

एष हि देवः प्रदिशो नु सर्वाः पूर्वो हि जातः स उ गर्भे अन्तः ।

स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः ।

प्राङ्मुखो देव । हे अग्ने । ममाभिमुखो भव ।

**Dikpaalaka Pooja (worshipping the rulers of directions)**

ॐ इन्द्राय नमः। ॐ अग्नये नमः। ॐ यमाय नमः। ॐ निर्ऋतये नमः। ॐ वरुणाय नमः। ॐ वायवे नमः। ॐ सोमाय नमः। ॐ ईशानाय नमः। ॐ ब्रह्मणे नमः। ॐ शेषाय नमः। ॐ अग्नये नमः। ॐ आत्मने नमः।

**Poorvaangam (preliminary offerings)**

ॐ प्रजापतये स्वाहा। प्रजापतय इदं न मम।

ॐ इन्द्राय स्वाहा। इन्द्रायेदं न मम।

ॐ अग्नये स्वाहा। अग्नय इदं न मम।

ॐ सोमाय स्वाहा। सोमायेदं न मम।

आरंभप्रभृति एतत्क्षणपर्यन्तं मध्ये संभावित समस्त दोष प्रायश्चित्तार्थं सर्व प्रायश्चित्तं होष्यामि। ॐ भूर्भुवस्सुवः स्वाहा। प्रजापतय इदं न मम।

**Quick Homam for Mahaganapathi**

ॐ गं गणपतये नमः। असुनी ते पुनरस्मासु चक्षुः पुनः प्राणमिह नो देहि भोगं। ज्योक्पश्येम सूर्यमुच्चरन्तमनुमते मृळया नः स्वस्ति। ॐ श्री महागणपति प्राणशक्त्यै नमः। अत्र आगच्छ। आवाहितो भव। स्थापितो भव। सन्निहितो भव। सन्निरुद्धो भव। अवकुंठितो भव। प्रसीद प्रसीद।

लं पृथिव्यात्मने नमः। गन्धं समर्पयामि।

हं आकाशात्मने नमः। पुष्पं समर्पयामि।

यं वाय्वात्मने नमः। धूपं आघ्रापयामि।

रं अग्न्यात्मने नमः। दीपं दर्शयामि।

वं अमृतात्मने नमः। नैवेद्यं समर्पयामि।

सं सर्वात्मने नमः। सर्वोपचारान् समर्पयामि।

ॐ गं गणपतये नमः स्वाहा।

**Praana Pratishthaapanaa (invocation of main deity)**

अस्य श्री प्राणप्रतिष्ठापन मंत्रस्य ब्रह्म विष्णु महेश्वरा ऋषयः ऋग्यजुस्सामाथर्वाणि छन्दाꣳसि श्री कुजो देवता । क्रां बीजं । क्रीं शक्तिः । क्रौं कीलकं । क्रां अंगुष्ठाभ्यां नमः । क्रीं तर्जनीभ्यां नमः । क्रूं मध्यमाभ्यां नमः । क्रैं अनामिकाभ्यां नमः । क्रौं कनिष्ठिकाभ्यां नमः । क्रः करतल करपृष्ठाभ्यां नमः । क्रां हृदयाय नमः । क्रीं शिरसे स्वाहा । क्रूं शिखायै वषट् । क्रैं कवचाय हुं । क्रौं नेत्रत्रयाय वौषट् । क्रः अस्त्राय फट् । भूर्भुवस्सुवरोमिति दिग्बंधः ।

ध्यानं - अंगारकं धरापुत्रं रुद्रस्वेदोद्भवं कुजं । शक्तिहस्तं अजारूढं मंगळं प्रणमाम्यहं ॥

ॐ क्रां क्रीं क्रौं यं रं लं वं शं षं सं हं ळं क्षं । ॐ हंसः सोऽहं सोऽहं हंसः । श्री कुजस्य प्राण इह प्राणः । जीव इह स्थितः । सर्वेन्द्रियाणि वाङ्मनस्त्वक् चक्षुः श्रोत्र जिह्वाघ्राण प्राणापानव्यानोदानसमानाः इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा । सान्निध्यं कुर्वन्तु स्वाहा । असुनी ते पुनरस्मासु चक्षुः पुनः प्राणमिह नो देहि भोगं । ज्योक्पश्येम सूर्यमुच्चरन्तमनुमते मृळया नः स्वस्ति । क्रां क्रीं क्रौं । ॐ श्री कुज प्राणशक्त्यै नमः । अत्र आगच्छ ।

आवाहितो भव । स्थापितो भव । सन्निहितो भव । सन्निरुद्धो भव । अवकुंठितो भव । देव प्रसीद प्रसीद । यावद्धोमावसानकम् । तावत्त्वं प्रीतिभावेन मूर्तौ अग्नौ च सन्निधिं कुरु ।

**Panchopachaara Pooja (worship of god)**

लं पृथिव्यात्मने नमः । गन्धं समर्पयामि ।
हं आकाशात्मने नमः । पुष्पं समर्पयामि ।
यं वाय्वात्मने नमः । धूपं आघ्रापयामि ।
रं अग्न्यात्मने नमः । दीपं दर्शयामि ।
वं अमृतात्मने नमः । नैवेद्यं समर्पयामि ।
सं सर्वात्मने नमः । सर्वोपचारान् समर्पयामि ।

**Parivaara Devata Aahutis (offerings to associates)**

ॐ भूदेव्यै स्वाहा । ॐ क्षेत्रपालकाय स्वाहा ।

**Pradhaana Homam (main part)**

स्वाहा

वौषट्

ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं। अपाꣳ रेताꣳसि जिन्वति। स्वाहा।

ॐ धरणीगर्भ संभूतं विद्युत्कांति समप्रभं। कुमारं शक्तिहस्तं तं मंगळं प्रणमाम्यहं। स्वाहा।

अंगारक महीपुत्र भगवन् भक्तवत्सल। नमोऽस्तु ते ममाशेष ऋणमाशु विमोचय। स्वाहा।

ॐ मंगळो भूमिपुत्रश्च ऋणहर्ता धनप्रदः। स्थिरासनो महाकायः सर्वकामफलप्रदः। स्वाहा।
लोहितो लोहिताक्षश्च सामगानां कृपाकरः। धरात्मजः कुजो भौमो भूमिदो भूमिनन्दनः। स्वाहा।
अंगारको यमश्चैव सर्वरोगापहारकः। वृष्टेः कर्ता च हर्ता च सर्वदेवैश्च पूजितः। स्वाहा।

ॐ मंगळाय स्वाहा। ॐ भूमिपुत्राय स्वाहा। ॐ ऋणहर्त्रे स्वाहा। ॐ धनप्रदाय स्वाहा। ॐ स्थिरासनाय स्वाहा। ॐ महाकायाय स्वाहा। ॐ सर्वकामफलप्रदाय स्वाहा। ॐ लोहिताय स्वाहा। ॐ लोहिताक्षाय स्वाहा। ॐ सामगानां कृपाकराय स्वाहा। ॐ धरात्मजाय स्वाहा। ॐ कुजाय स्वाहा। ॐ भौमाय स्वाहा। ॐ भूमिदाय स्वाहा। ॐ भूमिनन्दनाय स्वाहा। ॐ अंगारकाय स्वाहा। ॐ यमाय स्वाहा। ॐ सर्वरोगापहारकाय स्वाहा। ॐ वृष्टेः कर्त्रे स्वाहा। ॐ वृष्टेः हर्त्रे स्वाहा। ॐ सर्वदेवैश्च पूजिताय स्वाहा।

ॐ महीसुतो महाभागो मंगळो मंगळप्रदः। महावीरो महाशूरो महाबल पराक्रमः॥ स्वाहा।
महारौद्रो महाभद्रो माननीयो दयाकरः। मानदोऽमर्षणः क्रूरः तापपापविवर्जितः॥ स्वाहा।
सुप्रतीपः सुताम्राक्षः सुब्रह्मण्यः सुखप्रदः। वक्र स्तम्भादि गमनो वरेण्यो वरदस्सुखी॥ स्वाहा।
वीरभद्रो विरूपाक्षः विदूरस्थो विभावसुः। नक्षत्रचक्रसंचारी क्षत्रपः क्षात्रवर्जितः॥ स्वाहा।
क्षयवृद्धि विनिर्मुक्तः क्षमायुक्तो विचक्षणः। अक्षीणफलदः चक्षुः गोचरः शुभलक्षणः॥ स्वाहा।
वीतरागो वीतभयो विज्वरो विश्वकारणः। नक्षत्रराशिसंचारो नानाभयनिकृन्तनः॥ स्वाहा।
कमनीयो दयासारः कनत्कनकभूषणः। भयघ्नो भव्यफलदो भक्ताभयवरप्रदः॥ स्वाहा।
शत्रुहन्ता शमोपेतः शरणागतपोषकः। साहसः सद्गुणाध्यक्षः साधुः समरदुर्जयः॥ स्वाहा।

दुष्टदूरः शिष्टपूज्यः सर्वकष्टनिवारकः। दुश्चेष्टावारको दुःखभंजनो दुर्धरो हरिः॥ स्वाहा।

दुःस्वप्नहन्ता दुर्धर्षो दुष्टगर्वविमोचकः। भरद्वाजकुलोद्भूतो भूसुतो भव्यभूषणः॥ स्वाहा।

रक्ताम्बरो रक्तवपुः भक्तपालनतत्परः। चतुर्भुजो गदाधारी मेषवाहोऽमिताशनः॥ स्वाहा।

शक्तिशूलधरः शक्तः शस्त्रविद्याविशारदः। तार्किकः तामसाधारः तपस्वी ताम्रलोचनः॥ स्वाहा।

तप्तकांचनसंकाशो रक्तकिंजल्कसन्निभः। गोत्राधिदेवो गोमध्यचरो गुणविभूषणः॥ स्वाहा।

असृगंगारकोऽवन्ति देशाधीशो जनार्दनः। सूर्ययाम्यप्रदेशस्थो यौवनो याम्य दिङ्मुखः॥ स्वाहा।

त्रिकोणमंडलगतः त्रिदशाधिपसन्नुतः। शुचिः शुचिकरः शूरः शुचिवश्यः शुभावहः॥ स्वाहा।

मेषवृश्चिकराशीशो मेधावी मितभाषणः। सुखप्रदः सुरूपाक्षः सर्वाभीष्टफलप्रदः॥ स्वाहा।

**Punah Pooja (worship again)**

ॐ कुजाय नमः। नैवेद्यं समर्पयामि।

ॐ कुजाय नमः। नीराजनं समर्पयामि।

**Uttaraangam (vote of thanks)[1]**

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम्। स्वाहा। प्रजापतय इदं न मम॥

ॐ भूः स्वाहा। अग्नय इदं न मम॥

ॐ भुवः स्वाहा। वायव इदं न मम॥

ॐ सुवः स्वाहा। सूर्यायेदं न मम॥

यदस्य कर्मणोऽत्यरीरिचं यद्वान्यूनमिहाकरम्। अग्निष्टत् स्विष्टकृद्विद्वान् सर्वं स्विष्टं सुहुतं करोतु स्वाहा। अग्नये स्विष्टकृत इदं न मम॥

ॐ भूर्भुवस्सुवः स्वाहा। प्रजापतय इदं न मम॥

अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु। अग्ने तदस्य कल्पय त्वꣳ हि वेत्थ यथातथम्। स्वाहा। अग्नय इदं न मम॥

पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः। अग्ने तदस्य कल्पय त्वꣳ हि वेत्थ यथातथम्। स्वाहा। अग्नय इदं न मम॥

[1] Skip this and go to the next section to find a shorter procedure for uttaraangam.

यत्पाकत्रा मनसा दीनदक्षा न। यज्ञस्य मन्वते मर्तासः। अग्निष्टद्धोता क्रतुविद्विजानन्। यजिष्ठो देवान् ऋतुशो यजाति। स्वाहा। अग्नय इदं न मम॥

ॐ भूः स्वाहा। अग्नय इदं न मम॥

ॐ भुवः स्वाहा। वायव इदं न मम॥

ॐ सुवः स्वाहा। सूर्यायेदं न मम॥

अस्मिन् होमकर्मणि मध्ये संभावित समस्त मंत्रलोप तंत्रलोप क्रियालोप भक्तिलोप श्रद्धालोप नियमलोप निष्ठालोप द्रव्यलोपादि समस्त दोष प्रायश्चित्तार्थं सर्व प्रायश्चित्ताहुतिं होष्यामि। ॐ भूर्भुवस्सुवः स्वाहा। प्रजापतय इदं न मम॥

ॐ श्री विष्णवे स्वाहा। विष्णवे परमात्मन इदं न मम॥

ॐ नमो रुद्राय पशुपतये स्वाहा। रुद्राय पशुपतय इदं न मम॥

**Uttaraangam – shorter version (vote of thanks)**

ॐ भूः स्वाहा। अग्नय इदं न मम॥

ॐ भुवः स्वाहा। वायव इदं न मम॥

ॐ सुवः स्वाहा। सूर्यायेदं न मम॥

ॐ भूर्भुवस्सुवः स्वाहा। प्रजापतय इदं न मम॥

ॐ श्री विष्णवे स्वाहा। विष्णवे परमात्मन इदं न मम॥

ॐ नमो रुद्राय पशुपतये स्वाहा। रुद्राय पशुपतय इदं न मम॥

**Suddhaanna Bali (sacrifice of pure rice)**

ॐ पार्षदेभ्यो नमः। बलिं समर्पयामि।

**Vasordhaaraa (stream of excellence)**

ॐ शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च मऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे॥

**Poornaahuti**

ॐ पूर्णाहुतिमुत्तमां जुहोति । सर्वं वै पूर्णाहुतिः । सर्वमेवाप्नोति । अथो इयं वै पूर्णाहुतिः । अस्यामेव प्रतितिष्ठति ।
ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ कुजाय पूर्णाहुतिं समर्पयामि ।

ॐ ब्रह्मार्पणं ब्रह्महविर् ब्रह्माग्नौ ब्रह्मणा हुतं । ब्रह्मैव तेन गन्तव्यं ब्रह्म कर्म समाधिना ॥

**Winding Up and Meditation**

सप्त ते अग्ने समिधः सप्तजिह्वाः सप्त ऋषयस्सप्तः धाम प्रियाणि । सप्त होत्रा सप्त धात्वा यजन्तिसप्तयोनीरापृणस्वा घृतेन स्वाहा । अग्नये सप्तवत इदं न मम ॥

अदितेऽन्वमंस्थाः । अनुमतेऽन्वमंस्थाः । सरस्वतेऽन्वमंस्थाः । देव सवितः प्रासावीः ।

**Udvaasana (good bye)**

अस्मादग्नेः श्रीमहागणपतिं यथास्थानं प्रतिष्ठापयामि ।
अस्मान्मूर्तेश्च अग्नेश्च श्री कुजं यथास्थानं प्रतिष्ठापयामि ।

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम । अग्नये नमः ॥

**Conclusion**

मंत्रहीनं क्रियाहीनं भक्तिहीनं हुताशन । यद्धुतं तु मया देव परिपूर्णं तदस्तु ते ॥
प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै । यानि तेषामशेषाणां श्री कृष्णस्मरणं परं ॥ श्री कृष्ण कृष्ण कृष्ण ।
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् । करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥

अनेन दिव्य मंगळ होमेन भगवान् कुजः प्रीयताम् । ॐ तत्सत् । सर्वम् श्री कृष्णार्पणमस्तु । ॐ शान्तिः शान्तिः शान्तिः ।